## ॥ शान्ति पञ्चकम् ॥

शन्नो मित्रश्शंवरुणः । शन्नो भवत्वर्यमा । शन्न इन्द्रो बृहस्पतिः । शन्नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षंब्रह्मासि । त्वमेव प्रत्यक्षंब्रह्मवदिष्यामि । ऋतंव्वदिष्यामि । सत्यंव्वदिष्यामि । तन्मामवतु तद्वक्तारमवतु । अवतु माम् । अवतु वक्तारम् । ओं शान्तिश्शान्तिश्शान्तिः ॥

शन्नो मित्रश्शंव्वरुणः । शन्नोभवत्वर्यमा । शन्न इन्द्रो बृहस्पतिः । शन्नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वमेव प्रत्यक्षं ब्रह्मावादिषम् । ऋतमवादिषम् । सत्यमवादिषम् । तन्मामावीत् । तद्वक्तारमावीत् । आवीन्माम् । आवीद्वक्तारम् । ओं शान्तिश्शान्तिश्शान्तिः ॥

सहनाववतु । सह नौ भुनक्तु । सहवीर्यङ्करवावहै । तेजस्विनावधीतमस्तु मा विद्विषावहै । ओं शान्तिश्शान्तिश्शान्तिः ॥

नमो वाचे याचोदिता याचानुदिता तस्यै वाचे नमो नमो वाचे नमो वाचस्पतये नम ऋषिभ्यो मन्त्रकृद्भ्यो मन्त्रपतिभ्यो मामामृषयो मन्त्रकृतो मन्त्रपतयः परादुर्माऽहमृषीन्मन्त्रकृतो मन्त्रपतीन्परादां व्वैश्वदेवीं व्वाचमुद्यासं शिवामदस्ताञ्जुष्टान्देवे भ्यश्शर्म मे द्यौश्शर्मपृथिवी शर्म विश्वमिदं जगत् । शर्म चन्दश्च सूर्यश्च शर्म ब्रह्म प्रजापती । भूतंव्वदिष्ये भुवनंव्वदिष्ये तेजो वदिष्येयशोवदिष्ये तपो वदिष्ये ब्रह्म वदिष्ये सत्यं व्वदिष्ये तस्माअहमिदमुपस्तरण मुप स्तृण उपस्तरणं मे प्रजायै पशूनां भूयादुपस्तरणमहं प्रजायै पशूनां भूयासं प्राणापानौ मृत्योर्मापातं प्राणापानौ मामाहासिष्टं मधुमनिष्ये मधुजनिष्ये मधु वक्ष्यामि मधु वदिष्यामि मधुमतीन्देवेभ्यो वाचमुद्यासं शुश्रूषेण्यां मनुष्येभ्यस्तं मादेवा अवन्तु शोभायै पितरोऽनुमदन्तु । ओं शान्तिश्शान्तिश्शान्तिः ॥

तच्छंय्योरावृणीमहे । गातुंय्यज्ञाय । गातुं य्यज्ञपतये । दैवी स्वस्तिरस्तु नः । स्वस्तिर्मानुषेभ्यः । ऊर्ध्वञ्जिगातु भेषजम् । शन्नो अस्तुद्विपदे । शञ्चतुष्पदे । ओं शान्तिश्शान्तिश्शान्तिः ॥